International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2017; 3(6): 13-15
© 2017 IJSR
www.anantaajournal.com
Received: 05-09-2017
Accepted: 06-10-2017

**डा. सुजितमिश्र**
अध्यापक: रमोदवीमहाविद्यालय:,
भुवनेश्वरम्, उड़ीसा, भारत

**Correspondence**
**डा. सुजितमिश्र**
अध्यापक: रमोदवीमहाविद्यालय:,
भुवनेश्वरम्, उड़ीसा, भारत

# ध्वन्यालोके सामाजिक मूल्यवोध: एकमध्ययनम्

**डा. सुजितमिश्र**

**प्रस्तावना**
**उपक्रम:**
साहित्यं समाजस्य दर्पणम्। अत: साहित्यशास्त्रमपि सामाजिकमूल्यबोधं सूचयितुं प्रवर्त्तते। आनन्दवर्धनस्य ध्वन्यालोकस्याध्ययनेन तदानीन्तनसामाजिक-वस्थाया ज्ञानं भवितुमर्हति। तत्र स्थितेषु उदाहरणश्लोकेषु सामाजिकावस्थाया: चित्रं चित्रितमस्ति। न केवलं शव्दार्थकाव्यस्वरूपरसगुणरीतिदोषध्वनिभावालङ्कारादीनां विषयाणां निरूपणं प्रतिपादनं वा काव्यशास्त्रास्यास्य प्रयोजनमस्ति अपितु अस्य शास्त्रस्याध्ययनेन सामाजिकमूल्यवोधस्यापि ज्ञानं भवितुमर्हति। उदाहरणश्लोकानांम-ध्ययनेन अस्माभिर्ज्ञायन्ते यत् तत्र समाजे नैके सम्प्रदाया: सन्ति। यतो हि तत्र आनन्दवर्धनेन साम्प्रदायिक श्लोकानां उदाहरणम् प्रयुक्तमस्ति।

**१.२) उदाहरणश्लोकानां स्वरूपम्**
यथा किञ्चन यन्त्रं सञ्चालयितुं वैज्ञानिका: समानयन्त्राङ्गं तत्र समारोयन्ति तथा एते आलङ्कारिका: काव्यनियमान् नियमीकर्त्तुं[१] पूर्वोपकल्पितान् उदाहरणश्लोकान् च स्वीकुर्वन्ति। अस्मात् उदाहरणश्लोकात् सामाजिकावस्थाया: ज्ञानं भवति। यथा अनुरागवतीसन्ध्या इत्यत्र ध्वन्यालोके प्राधान्यं निषेधरूपे वाच्ये वर्तते न तु व्यङ्ग्ये। अत्र नायिकानायकयो: व्यवहार: अस्माभिर्ज्ञायन्ते। ध्वन्यालोककार: प्रतीयमानस्यार्थस्य तत्वमवगमनाय 'अत्त एत्थ णिमज्जई' इति यथायुक्तस्य श्लोकस्य प्रयोगमकरोत्। अत्र अतिवैवाहिकसम्वन्ध: समाजे आसीदिति ज्ञायते। अपि च यान्ये श्लोका: तत्र तत्र काव्यशास्त्रेषु प्रयुक्ता: सन्ति ते तदानीन्तन समाजस्य विविधावस्थाया: ज्ञानं कारयति। ते भवन्ति।

**१.३ शास्त्ररचनाकाले तदानीन्तनसमाजस्यवस्था**
**१.३.१) समाजे स्त्रीणामवस्था -** तदानीन्तन समाजे कथं स्त्रीणामवस्था आसीदिति उदाहरणश्लोकानामध्ययनेन ज्ञातो भवति। समाजे स्त्रीय: निर्यातिता किञ्च धनिका: सुखस्वास्छन्द्यावलुण्ठिता: अभवत्। अपि च एता: वहुनायकाभीष्टा:, कलुषिता: कामलोलुपिता: आसन्। कुत्र च शृङ्गार तत्त्वभिज्ञा: सतीभावापन्ना: एकपतिव्रता: कामकलाभिज्ञा: अनुपमा: धीराश्चासन्। एतै श्लोकै: स्त्रीणामवस्था अस्माभिर्ज्ञायते –

''अत्ता एत्य णिमज्जइ एत्य अहं दिअसअं पलोएहि।
मा पहिअ रति अन्धअ सेज्जाए मह णिमज्जहिसि।।''[२]
(ध्व.१.४.२.)

''भम धम्मिअ वसत्योसो सुणओ अज्जमारिओ देण।
गोलाणइकच्छकुङ्गवासिणा दरिअ सिहेण।।''
(ध्व.१.४.१.)

---

१. प्राचीनै: शास्त्रकारै ये उदाहरण श्लोका: पूर्वोपकलल्पिता: ते पूर्वोपकल्पिता: श्लोका: तान् - पूर्वोपल्पितान्।
२. ध्व - ध्वन्यालोक:

श्लोकेऽस्मिन् गोदावरीतीरस्थलताकुञ्जं स्वाभिसारस्थलीभुतं प्रति कुसुमचयनार्थं गच्छन्तं धार्मिकं विघ्नं मन्वाना काचित् विदग्धापि सुन्दरी मुग्धेव तं गमनान्निषेद्धं व्यञ्जनया कथयति। अनेन स्त्रीणां समाजे अवस्था कीदृशी आसीत् तदापि ज्ञायते।

''वच्च मह विवअ एक्केइ होन्तु णीसासरोह अन्वा इं।
मा तुच्छ वितीअ वीणा दक्खिणहअस्य जाअन्तु।।''
(ध्व.१.४.३.)

अत्रापि सर्वदा शठत्वं मयि केवलं प्रदर्शयति वस्तुत तस्यामेव गाढमनुरक्त इति भर्त्सनं व्यज्ञते। अत्रापि समाजे स्त्रीणामवस्था अस्माभि ज्ञातुं शक्यते।

कस्स वा ण होइ दट्ठुण पिव्वाए सन्वणं अहरम्।
सभमरपउमग्घाइणि वारिअवामे सहसु एहिणम्।।''
(ध्व.१.४.६.)
अस्मात् श्लोकादपि तत्कालिन समाजे स्त्रीणामवस्था ज्ञायते।

**१.३.२. लोकशिक्षा**

ध्वन्यालोकस्य उदाहरणश्लोकानामध्ययनेन तदानीन्तनस्य शिक्षाव्यवस्था ज्ञायते। विद्यार्थीनां जीवनं तेषां जीवनचर्या आचरणं व्यवहारश्च वहुषु पयेषु समालोच्यते। व्रह्मचारिणां जीवनं तेषां अध्ययनश्च दृश्यते तत्र तत्र उदाहरणश्लोकेषु। गुरुकुलपरम्परा व्यवस्था शिक्षाया: मूलभित्तिरासीत्। शिक्षा जीवनस्य मानदण्ड: आसीत्। श्लोका: भवन्ति।

सुवर्णापुषां पृथिवीं चिन्वन्ति पुरूषास्त्रय:।
सुरश्च कुतविधश्च यश्च जानाति सेवितुम्।।''
(ध्व.१.१३.९.)

'कृतविध:' इत्यस्मात् श्लोकात् शिक्षाया: महत्वमवगम्यते।

**१.३.३. अतिवैवाहिकसम्बन्ध: - (Polygamous relation)**

समाजे स्त्रीणं पुरूषाणाश्च मिथ: अनैतिकातिवैवाहिक-सम्बन्धश्चासीन्। नैकेषु श्लोकेषु एतेषानुदाहरणं प्राप्यते। स्त्रीणां परपुरूषसम्पर्क: समाजे प्रचलितमासीत्। अपिच नायिकाया: शृङ्गारचेष्टा कामुकता (pang for love) वर्णिता तत्र तत्र उदाहरण श्लोकेषु। श्लोका: सन्ति –

''अत्ता एत्य णिमज्जइ एत्य अहं दिअसअं पलोएहि।
मा पहिअ रतिअन्धअ सेज्जाए मह णिमज्जहिसि।।''
(ध्व.१.१.२.)

''नि:रोषच्युतयन्दनं स्तनतरं...'' श्लोकस्य उदाहरणं काव्यप्रकारो ग्रन्थेऽपि अस्माभि: लभ्यन्ते।

''सिहिपिच्छकण्णपूरा जाआ वाहस्य गव्विरी भम्मइ।
मुत्ताफलरइअपसाहणाणं मज्झे सवत्तीणम्।''

अन्यासु नायिकासु आसक्त: सन् नायक: इस्तिनोऽप्यमारयत किन्तु मयि त्वत्यन्तासक्त: निरन्तर-स्मरसमरपरायणतयाऽलब्धभूयोवकाशो गृहपर्यन्तचरान् मयूरानेव मारयितुं नायक इदानीं समर्थेति स्व स्वभावप्रकर्षवस्तु अत्र व्यनक्ति। तथा च कस्स वा ण होइ रोसो दट्ठुण.... (ध्वन्यालोक: १.४.६.)

**संस्कृतं यथा**

कस्य वा न भवति रोषो दृष्ट्वा प्रिया: सव्रणमधरम्।
सभ्रमरपद्माघ्रायिणि! वारितवामे! सहस्वेदानीम्।।

इत्यत्र श्लोके विदुष्या: सख्या: चाटुक्ति: समुपस्थापिता। येन समाजे पवत्तेमानरस्य अतिवैवाहिकसम्वन्धस्य ज्ञानं भवितु मर्हति। श्लोकस्य विश्लेषणं हत्यं कर्त्तुं शक्यते। तद्यथा –

| वाच्चार्थस्य विषय: | व्यहयार्थस्य विषय: | व्यङ्ग्यार्थ: |
|---|---|---|
| नायिकां सखी बोधयिति | १. कान्त: | भ्रम: अधरदंशनं करोति न उपपति:। |
| नायिकां सखी बोधयति | २. उपपति: | इदानीं सखी समस्याया: समाधानमकोरत् अत: पुन: व्यक्ताधरक्षतं न करिष्यतीति। |
| नायिकां सखी बोधयति | ३. नायिका | कथं सखी समस्याया: समाधानमकरोत् अत: मम कथायां सर्वदा स्थास्यसि इति नायिकां प्रति सखी कथयति। |
| नायिकां सखी बोधयति | ४. सपत्नी प्रतिवेशिनश्च | कान्तं प्रवञ्चनामकारयदिति सपत्नी चिन्तयति। |
| नायिकां सखी बोधयति | ५. श्वश्रू: | ममबधू सनी सावित्रीव भवतीति चिन्तयतिश्वश्रु:। |

**१.३.४. विरहदु:खं तथा सख्या अविवेकिता च (Pang of love and the untruthful companions)**

तदानीं समाजे प्राकृतिक चित्रं कविना यत् वर्णितं तदापि शास्त्रकार: निर्देशितम्। प्रणयदु:खं विरहदु:खं किञ्च सख्या अविवेकतादय: घटना: उदाहरणश्लोकेषु हश्यन्ते। विप्रलब्धानायिकाया: कामलोलुपता कामीयेष्टा परपुरूषमिलनाकाउ्क्षा वा समाजे हश्यन्ते। कुत्र वाच्यार्थस्य बोधव्या नायिका भवति परन्तु व्यङ्गार्थस्य विषय: तांस्तान् बोधव्यान् प्रति विविधान् रूपाणि धत्ते।[३]

श्लोका: भवन्ति -
भम धम्मिअ विसत्यो स पुणओ......
(ध्वन्यालोक: १.४.१)
अत्ता एत्यणिमज्जइ एत्य......
(ध्वन्यालोक: १.४.२)

३. ध्व - ध्वन्यालोक:

**१.३.५. वास्तवप्रेम : (Natural love)**

ध्वन्यालोके प्राकृतोदाहरणेषु समाजस्य विविधानि रूपाणि च हश्यन्ते। तथा च विविधलोकव्यवहारभिज्ञा: कवय: सुक्षानिसुक्ष्मभावानां चयनं अकुर्वन्। प्रत्युत संस्कृतोदाहरणेषु नागरिकजिवनस्य चित्रं धर्मशास्त्रसम्भतव्यसहारश्च हश्यन्ते। उदाहरणश्लोका: समाजस्य विविधनियमा-चारविचारव्यवहारसंस्कारादीनां सम्यक् वर्णनं करोति। साधारणजनानां सामाजिक व्यवहारश्च प्रमाणयति। उदाहरणं प्रस्तुयते

''शून्यंवासगृहं विलोक्यशयनादुत्याय किञ्चिच्छनै
र्निद्राव्याजमुपागतस्य सुचिरं निर्वण्यपत्युर्मुखम्।
विस्रब्धं परिचुम्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता वाला चिरं चुम्विता।।''[४]
(ध्व.४.२.६.)

४. The difference of social norms is conspicuous in two streams of Udaharana Sloka. One is Sanskrit and the other is Pākrit. the Saīalbehavior reflected in Sanskrit verse is much higher than the Pākrit verse. And the Social Behavior is much more diversified in the Pākrit than Sanskrit examples.

सङ्केत कालमनसं विरं ज्ञात्वां विदग्धया।
हसन्नेत्रार्पिताकूतं लीलाप.... निमीलितम्।।
(ध्व.२.२२.३२)

**१.३.६. पुरूषव्यक्तित्वम् (Male personality)**

पुरूषव्यक्तित्वं नैकेषुस्थलेषु हश्यते। राज्ञः चरित्रम् साधारणजनस्य च चरित्रं तत्र तत्र वर्णितेष्वदाहरणश्लोकेषु हश्यन्ते। अत्र पीडामनुभवनीति अनुभवतिशव्दद्वारा इक्षोः मर्द्धनं सूच्यते। अस्यच लक्षणा प्रयोजनं यत्किञ्चिन तत्रादरास्पदम्। अस्मात् पुरूषव्यक्तित्वं सूच्यते। यथा –

''परार्थे यः पीडामनुभवति भङ्गेऽपि मधुरो
यदीयः सर्वेषामिह खलु विकारोऽप्यभिमतः।
न सम्प्राप्तो वृद्धिं यदि स मृशमक्षेत्रपतिः
किभिक्षोर्दोषोऽसौ न पनरगुणायाः मरूभवः।।''
(ध्व.-श्लोकाः १.१४.१५)

**अपिच -**

''सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरूषास्त्रयः।
सूरश्च कृतविधश्च यश्च जानाति सेवितुम्।।''
(ध्व. १.१३.९.)

**१.३.७. समाजे सुभाषितश्लोकानां प्रभावः**

ध्वन्यालोके उदाहरणश्लोकाः नैतिकाधारसम्पनाश्चासन्। वहुविधाः नीतिसम्पर्किताः श्लोकाः हश्यन्ते। अतः अस्मात् ज्ञायते तदा मूल्यशिक्षायाः प्रभावः (ग्हत्लिहम र्द्न्ल्लि (र्ल्मूदह) समाजे आसीत्। ते श्लोकाः भवन्ति –

''सत्यं मनोरमा रामाः सत्यं रम्या विभूतयः।
किंतु मत्ताङ्गनापाङ्गभङ्गलोलं हि जीवितम्।।''
(ध्व.३.३०.३७)
''सुवर्णपुष्पां पृथिवीं चिन्वन्ति.....''
(ध्व.१.१३.९)

**१.३.८. समाजे दार्शनिकश्लोकानां प्रभावं**

ध्वन्यालोके केचन दार्शनिकतत्वपरिपूर्णाः श्लोकाश्चासन्। एते श्लोकाः समाजे दार्शनिकमूल्यवोधस्य प्रभावं विस्थारयति। ते सन्ति –

''या निशा सर्वभुतानां तस्यां जागर्ति संयमी।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः।।''
(ध्व.३.१.३.)

''यच्च कामसुखं लोके यच्च दिव्यं महत् सुखम्।
तृष्णाक्षयसुखसैते नार्हतः षोऽशीं कलाम्।।''
(ध्व.३.३५)

अत्र तृषराक्षयजन्य सुखस्य परिषोषकत्वेन शान्तरसः प्रतीयते। अस्ति ऐतेषां श्लोकानां महत्वम्।

**१.६.९. समाजे पौराणिककथानां प्रभावः**

पुराणानि खलु निखिल ज्ञानमाधारभुतानि। अग्निपुराणे ३३७ अध्ययान् ३४७ अध्यायं यावत् काव्यशास्त्रसम्बन्धीनां विषयाणां संङ्कलनं विधते। एतादृशानां प्रयुक्तानां पौराणिककथानां प्रभावः समाजे वर्तते।

पौराणिकेतिहासकथानां पालनेन कश्चन रामादिवत् प्रवत्तितव्यं न रावणादिवत् इति उपदेशः लभ्यते। वहवः सन्ति, तादृशः श्लोकाः दिङ्मात्रेण अत्रोदाहरेणं दीयते यथा -

१. स्निग्धश्यामलकान्ति..... रामायणकाव्यस्यप्रभावः।
२. क्षिप्रहस्तावलग्नः प्रसम भिहितां.... शिवपुराणस्य अभावः)
३. एवं पादिनि देवर्षिः पार्श्वेपितुरधो मुखी इत्यत्र पौराणिक कथायाः प्रभावे वर्तते।

**१.३.१०. समाजे साम्पदायिकश्लोकानां प्रभावः**

उदाहरणश्लोकानां पठनेन अस्माभिः ज्ञायते यत् तत्र समाजे विभिन्नाः सम्प्रदायाः सन्ति। शैवशाक्त-वैष्णवेत्यादिनां प्रभावः यथा - स्निग्धश्यामलकान्ति इत्यत्र रामभक्तानां सूचना मिलति। अत्र च कअष्णसम्प्रदायतथ्यान् उपलभ्यते। ''दअष्ट्वा केशवेत्यादि''... श्लोकोत् समाजे नैके सम्प्रदायः अस्थीति ज्ञायते।

**१.३.११. प्राकृतश्लोकानां प्रभावः**

तदानीं संस्कृतश्लोकाः शास्त्रीयव्यवहारपरकाः आसन् परन्तु प्राकृतश्लोकाः साधारण जनानां वोधगम्याः च आसन्। साधारणजनानां भाषा प्राकृतभाषा इति उदाहरणश्लोकानामध्ययनेन ज्ञायते। साधारणजनानां वोधगम्या प्राकृतभाषा यदा संस्कृतभाषा विद्वतजनौ प्रचलिता सामाजिक भाषा आसीत्। शृङ्गारी येत् कविः इति मतानुसारं शृङ्गाररसस्य काव्ये प्राधान्यमस्ति। अतः शृङ्गाररसं अवगन्तुं इदं प्रचलिता प्राकृतभाषा सहजसाध्या आसीत्।

अतः सामाजिकमूल्वोधस्य ज्ञानं अस्मात् शास्त्रात् कथं भविष्यतीति मया सामान्यरूपेण चेष्टितम्। यस्य ज्ञानेन मूल्यशिक्षायाः प्रभावो वर्धिष्यतेति आशासे।

**सहायकग्रन्थसूची :-**

1. लोचन - तारावती टीकोपेता - ध्वन्यालोकः, चैखम्बाः प्रकाशनम्।
2. ..... S.K., History of Sanskrit Poetics, Oriental Book Centre, New Delhi.
3. झलकीकरः वामनाचार्यः, काव्यप्रकाशः, भण्डारकर् ओरिएन्टाल् इन्स्टिच्युट्, पुणे।
4. Kane P.V., The History of Sanskrit Poetic, MLBD Publication, New Delhi.
5. आचार्यः कृष्णमोहनः, लक्ष्मीटीका, साहित्यदर्पणः. कृष्णदासअकादभी, वारणासी।